नानावर्णः, पुं, (नानाविधो वर्णः ।) बहुविधशुक्लादिवर्णः । इति भरतः ॥ तत्पर्य्यायः । चित्रम् २ किर्म्मीरः ३ कल्माषः ४ शवलः ५ एतः ६ कर्व्वुरः ७ । इत्यमरः ।१।५।१७॥ विचित्रम् ८ शारङ्गम् ९ कर्व्वरः १० कर्म्मारः ११ चित्रलः १२ । इति शब्दरत्नावली ॥ ब्राह्मणक्षत्रियादिश्च ॥ (नानाविधो वर्णो यस्येति । विचित्रवर्णयुक्ते, त्रि । यथा, सुश्रुते । १ । ३८ ।
"नानावर्णा लब्धक्षवती प्रविरलाल्पपाण्डुत्वचप्ररोहाभिगुणभूयिष्ठा ॥")

नानाविधः, त्रि, (नाना विधाः प्रकारा यस्य ।) अनेकप्रकारः । विविधः । यथा,—
"तथा नानाविधैः पुष्पैर्द्धूपैर्दीपैरक्रयाहृतैः ॥"
इति हरिभक्तिविलासे १६ विलासः ॥

नानुष्ठेयं, त्रि, (न अनुष्ठेयम् ।) अननुष्ठेयम् । अकर्त्तव्यम् । इति व्याकरणम् ॥

नान्त्रं, क्ली, (नमत्यनेनेति । नम + "असुजिगमिनमिहनिविश्यशां वृद्धिश्च ।" उणां । ४ । १५६ । इति ष्ट्रन् वृद्धिश्च ।) स्तोत्रम् । इत्युणादिकोषः ॥

नान्दिकरः, पुं, (करोतीति । कृ + अच् । नान्द्याः नान्दीश्लोकस्य करः पाठकः । "ङ्यापोः संज्ञाछन्दसोर्बहुलम् ।" ६ । ३ । ६३ । इति ह्रस्वः ।) नान्दीकरः । इत्यमरटीकायां रमानाथः ॥

नान्दी, स्त्री, (नन्दन्त्यनयेति । नन्द + घञ् । निपातनात् दीर्घः । ततो ङीप् ।) नाटकाद्यादौ मङ्गलार्था देवद्विजादीनामाशीः । यथा,—
"आशीर्व्वचनसंयुक्ता स्तुतिर्यस्मात् प्रवर्त्तते ।
देवद्विजनृपादीनां तस्मान्नान्दीति सा स्मृता ॥
केचित्तु । भेरीप्राया नान्दी ।" इत्यमरटीकायां भरतः ॥ * ॥ नाटके विघ्नविघातायादौ नान्दी कार्य्या । यदाह भरतः ।
"यद्यप्यङ्गानि भूयांसि पूर्व्वरङ्गस्य नाटके ।
तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नप्रशान्तये ॥
देवद्विजनृपादीनामाशीर्व्वादपरायणा ।
नन्दन्ति देवता यस्मात्तस्मान्नान्दी प्रकीर्त्तिता ॥"
अन्यच्च ।
"देवद्विजनृपादीनामाशीर्व्वन्दनपूर्व्विका ।
नान्दी कार्य्या बुधैर्यत्नान्नमस्कारेण संयुता ॥
गङ्गा नागपतिः सोमः सुधा नन्दा जयाशिषः ।
एभिर्नामपदैः कार्य्या नान्दी धाराभिरङ्किता ॥
प्रशस्तपदविन्यासा चन्द्रसंकीर्त्तनान्विता ।
आशीर्व्वादपरा नान्दी योज्येयं मङ्गलात्मिका ॥
काचिद्द्वादशपदा नान्दी काचिदष्टपदा तथा ।
सूत्रधारः पठेन्नान्दी मध्यमस्वरमाश्रितः ॥"
इति मालतीमाधवटीका ॥
समृद्धिः । यथा । "नान्दी समृद्धिरिति कथ्यते ।" इत्युद्वाहतत्त्वे ब्रह्मपुराणम् ॥

नान्दीकः, पुं, (नान्दै नान्द्यर्थं कायतीति । कै + कः ।) तोरणस्तम्भः । इति त्रिकाण्डशेषः ॥

नान्दीकरः, त्रि, (नान्दीं करोतीति । कृ + "दिवाविभेति ।" ३ । २ । २१ । इति टः ।) नान्दीश्लोकपाठकारी । तत्पर्य्यायः । नान्दीवादी २ । इत्यमरः । ३ । १ । ३८ ॥ "केचित्तु भेरीप्राया नान्दी तद्वादनशीलः अत्र वदिकृणौ वादनार्थाविल्याहुः ।" इति भरतः ॥

नान्दीपटः, पुं, (नान्द्यै वृद्ध्यर्थं पटो यत्र ।) कूपादिमुखबन्धनम् । तत्पर्य्यायः । नान्दीमुखः २ वीनाहः ३ । इति हेमचन्द्रः । ४ । १५८ ॥

नान्दीमुखः, पुं, (नान्द्यै वृद्ध्यर्थं मुखं यस्य ।) कूपादिमुखबन्धनम् । इति हेमचन्द्रः । ४।१५८॥ वृद्धिश्राद्धभुक् पितृगणः । यथा,—
"नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृही ॥"
इति विष्णुपुराणम् ॥
स च पित्रादित्रिकं मातामहादित्रिकञ्च । इति गोभिलसूत्रम् ॥ (नान्द्या वृद्धेर्मुखम् ।) वृद्धिश्राद्धे, क्ली । यथा,—
"नान्दीमुखे विवाहे च प्रपितामहपूर्व्वकम् ।
अत्र नान्दीमुखपदस्य श्राद्धपरत्वे इत्युद्वाहतत्त्वलेखनादन्यत्र श्राद्धपरत्वम् ।" तदितिकर्त्तव्यता यथा । "तत्र गोभिलः । अथाभ्युदयिकश्राद्धे युग्मानाशादयेत् प्रदक्षिणमुपचारः ऋजवो दर्भाः यवैस्तिलार्थः सम्पन्नमिति तृप्तिप्रश्नः दधिवदराक्षताल्यमिश्राः पिण्डाः नान्दीमुखाः पितरः प्रीयन्तामिति दैवे वाचयित्वा नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च प्रीयन्तामिति न स्वधाञ्च प्रयुञ्जीतेति ॥ अपि च ।
स्वधयेतिपदस्थाने पुष्टाशब्दं वदेदिह ।
पितॄनितिपदात् पूर्व्वं वदेन्नान्दीमुखानिति ॥
कर्म्मादिषु च सर्व्वेषु मातरः सगणाधिपाः ।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥
प्रतिमासु च शुभ्रासु लिखिता वा पटादिषु ।
अपि वाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः ॥
कुड्यलग्नां वसोर्धारां सप्तवारान् घृतेन तु ।
कारयेत् पञ्च वारान् वा नातिनीचां न चोच्छ्रिताम् ॥
आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः ।
षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ॥
वशिष्ठोक्तो विधिः कृत्स्नो द्रष्टव्योऽत्र निरामिषः ।
अतः परं प्रवक्ष्यामि विशेष इह यो भवेत् ॥
प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा ।
उपवेश्य कुशान् दद्यादृजुनैव हि पाणिना ॥
निपातो न हि सव्यस्य जानुनो विद्यते क्वचित् ।
सदा परिचरेद्भक्त्या पितृनप्यत्र देववत् ॥
पितृभ्य इति दत्तेषु उपवेश्य कुशेषु तान् ।
गोत्रनामभिरामन्त्र्य पितृनर्घ्यं प्रदापयेत् ॥
नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते ।
पात्राणां पूरणादीनि दैवे नैव तु कारयेत् ॥
ज्येष्ठोत्तरकरान् युग्मान् कराग्राग्रपवित्रकान् ।
कृत्वार्घ्यं सम्प्रदातव्यं नैकैकस्यात्र दीयते ॥
मधु मध्विति यस्तत्र त्रिर्जपोऽशितुमिच्छताम् ।
गायत्र्यनन्तरं सोऽत्र मधुमन्त्रविवर्ज्जितः ॥
न चाश्नत्सु जपेदत्र कदाचित् पितृसंहिताम् ।
अन्य एव जपः कार्य्यः सोमसामादिकः शुभः ॥
यस्तत्र प्रकरोऽन्नस्य तिलवद्यववत्तथा ।
उच्छिष्टसन्निधौ सोऽत्र तृप्तेषु विपरीतकः ॥
सम्पन्नमिति तृप्ताः स्थ प्रश्नस्थाने विधीयते ।
सुसम्पन्नमिति प्रोक्ते शेषमन्नं निवेदयेत् ॥
प्रागग्रेष्वथ दर्भेषु आद्यामामन्त्र्य पूर्व्ववत् ।
अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति निक्षिताः ॥
द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः ।
मातामहप्रभृतींस्तु एतेषामेव वामतः ॥
सर्व्वस्मादन्नमुद्धृत्य व्यञ्जनैरुपसिच्य च ।
संयोज्य यवकर्कन्धुदधिभिः प्राङ्मुखस्ततः ॥
अवनेजनवत् पिण्डान् दत्वा विल्वप्रमाणकान् ।
तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत् ॥
उत्तरोत्तरदानेन पिण्डानामुत्तरोत्तरम् ।
भवेदधश्चाचरणादधोऽधः श्राद्धकर्म्मसु ॥
तस्मात् श्राद्धेषु सर्व्वेषु वृद्धिमत्स्वितरेषु च ।
मूलमध्याग्रदेशेषु ईषत्सक्तांश्च निर्व्वपेत् ॥
गन्धादीन्निक्षिपेत्तूष्णीं तत आचामयेत् द्विजान् ॥"
"अथाग्रभूमिमासिञ्चेत् सु सुप्रोक्षितमस्त्विति ।
शिवा आपः सन्त्विति च युग्मानेवोदकेन च ।
सौमनस्यमस्त्विति च पुष्पादानमनन्तरम् ॥
अक्षतञ्चारिष्टञ्चास्त्वित्यक्षतानपि दापयेत् ।
अक्षय्योदकदानन्तु अर्घ्यदानवदिष्यते ॥
षष्ठ्यैव नित्यं तत् कुर्य्यान्न चतुर्थ्या कदाचन ।
प्रार्थनासु प्रतिप्रोक्ते सर्व्वास्वेव द्विजोत्तमैः ॥
पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपात्रकृत् ।
युग्मानेव स्वस्तिवाच्यानङ्गुष्ठग्रहणं सदा ॥
कृत्वा धूर्य्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः ॥" * ॥
तन्निमित्तानि यथा, विष्णुपुराणे ।
"कन्यापुत्त्रविवाहे च प्रवेशे नववेश्मनः ।
नामकर्म्मणि बालानां चूडाकर्म्मादिके तथा ॥
सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने ।
नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृही ॥"
मत्स्यपुराणे ।
"अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके ।
पुंसवने निषेके च नववेश्मप्रवेशने ॥
देववृक्षजलादीनां प्रतिष्ठायां विशेषतः ।
तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्त्तितम् ॥"
कूर्म्मपुराणे ।
"तीर्थयात्रासमारम्भे तीर्थप्रत्यागमेषु च ।
वृद्धिश्राद्धं प्रकुर्व्वीत वहुसर्पिःसमन्वितम् ॥"
इति श्राद्धतत्त्वम् ॥

नान्दीमुखी, स्त्री, (नान्द्यै वृद्ध्यर्थं मुखं यस्याः । ङीप् ।) सामगेतरवृद्धिश्राद्धभुक्पितृगणः । इति यजुर्व्वेदीयवृद्धिश्राद्धपद्धतिः ॥ (क्षुधान्यविशेषः । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"कोरदूषकश्यामाकनीवारशान्तनुतुवरकोद्दालकप्रियङ्गुमधुलिकानान्दीमुखीकुरुविन्दगवेधुकवरुतकोदपर्णीमुकुन्दकवेणुयवप्रभृतयः क्षुधान्यविशेषाः ॥" चतुर्द्दशाक्षरवृत्तिविशेषः । अस्य लक्षणादिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥ * ॥ नान्दी-